# 14 - चतुर्दश दशकम्

## कपिलावतारम्

समनु स्मृत तावकाङ्घ्रि युग्मः स मनुः पङ्कज सम्भवाङ्ग जन्मा ।
निज मन्तर मन्तराय हीनं चरितं ते कथयन् सुखं निनाय ॥ ॥14-1॥

समये खलु तत्र कर्दमाख्यो द्रुहिणच्छाय भवस् तदीय वाचा ।
धृत सर्गरसो निसर्ग रम्यं भगवंस्त्वा मयुतं समास् सिषेवे ॥14-2॥

गरुडोपरि काल मेघ कम्रम् विलसत् केलि सरोज पाणि पद्मम् ।
हसितोल्लसि ताननं विभो त्वं वपु राविष्कुरुषे स्म कर्दमाय ॥ ॥14-3॥

स्तुवते पुलकावृताय तस्मै मनु पुत्रीं दयितां नवापि पुत्रीः ।
कपिलं च सुतं स्वमेव पश्चात् स्वगतिं चाप्यनुगृह्य निर्गतोऽभूः॥14-4॥

स मनुश् शतरूपया महिष्या गुणवत्या सुतया च देवहूत्या ।
भवदीरित नारदोपदिष्टः समगात् कर्दम मागति प्रतीक्षम् ॥ ॥14-5॥

मनु नोपहृतां च देव हूतिं तरुणी रत्न मवाप्य कर्दमोऽसौ ।
भवदर्चन निवृतोऽपि तस्यां दृढ शुश्रूषणया दधौ प्रसादम् ॥ ॥14-6॥

स पुनस् त्वदुपासन प्रभावात् दयिता कामकृते कृते विमाने ।
वनिताकुल सङ्कुलो नवात्मा व्यहरद् देव पथेषु देवहूत्या ॥ ॥14-7॥

शतवर्ष मथ व्यतीत्य सोऽयं नव कन्यास् समवाप्य धन्य रूपाः ।
वनयान समुद्यतोऽपि कान्ता हितकृत् त्वज्जन नोत्सुको न्यवात्सीत् ॥ ॥14-8॥

निजभर्तृ गिरा भवन्निषेवा निरताया मथ देव देवहूत्याम् ।
कपिलस्त्व मजायथा जनानां प्रथयिष्यन् परमात्म तत्व विद्याम् ॥ ॥14-9॥

वनमेयुषि कर्दमे प्रसन्ने मत सर्वस्व मुपादिशन् जनन्यै ।
कपिलात्मक वायु मन्दिरेश त्वरितं त्वं परिपाहि मां गदौघात् ॥ ॥14-10॥

॥ सदा सर्वत्र गोविन्द नाम संकीर्तनम् गोविन्दा....गोविन्दा ॥
॥ श्री गुरुवायूरप्पा शरणम् श्री हरये नमः॥